ISSN–2278-5655

AMIERJ Aarhat Multidisciplinary International Education Research Journal

**Volume–XI, Issue– IV** **July – August, 2022**

OPEN ACCESS Original Research Article

# महाकविश्रीभाष्यंविजयसारथिविरचितमन्दाकिन्यां व्याकरणवैशिष्ट्यम्

**डा. शिवरामभट्ट:**

अनुसन्धानप्रकाशनविभाग: राष्ट्रियसंस्कृतविश्वविद्यालय:, तिरुपति: ईसंकेत: - *drshivaram@nsktu.org*

**प्रस्तावना:**

मन्दाकिनी वियद्गङ्गा स्वर्णदी सुरदीर्घिका इति कोशानुसारं सुरनदी गङ्गेयं भारतीयानां पवित्रतमा जीवनदी वर्वर्ति। मन्दाकानि स्रोतांसि सन्त्यस्या: इति मन्दमकितुं शीलमस्या इति मन्दनाम्न: सरस: अकति[१] गच्छति इति वा मन्दाकिनीशब्दस्य व्युत्पत्ति: दरीदृश्यते। **स्रोतसामस्मि जाह्नवीति** भगवता परिकीर्तितेयं भारतीयानाम् आस्थाकेन्द्रेण सह पापतापहारिणी भुक्तिमुक्तिप्रदायिनी दकमयी परमपूजनीया महती देवता वरिवर्ति। भारते नद्यो नाम न केवलं जडधारा अपि तु लोकमातर उच्यन्ते। तत्र मन्दाकिन्या: वेदपुराणादिषु महन्महत्त्वमेजेगीयत[२]। नदीनां पावनत्वं गङ्गाशब्देन यथा द्योत्यते न तथा यमुनादिनामान्तरेण। यत: भगवद्विष्णुपदकमलसम्भूता शिवकपर्दशालिनी निलिम्पनिर्झरी इयं मन्दाकिनी महानदी लोकानां पानस्पर्शनिवासादिभि: लौकिकप्रयोजनवती पापनाशनेनालौकिकप्रयोजनवती च पाप्रथ्यते। अत एव भारतीयजनमानसे

"गङ्गा गङ्गेति यो ब्रूयात् योजनानां शतादपि।
मुच्यते सर्वपापेभ्यो विष्णुलोकं च गच्छति" इति धारणा वरीवृत्यते।

वेदादिवाङ्मयपरिकीर्तिता सेयं त्रिपथगा मन्दाकिनी नवनवोन्मेषशालिप्रज्ञावतां कविपुङ्गवानां मनस्सिंहासनविराजिता तदीयनानावचोभि: स्तोत्रादिभि: परिगुम्फिता गेहे गेहे मन्दिरे मन्दिरे जेगीयमाना पापं तापं च जेह्रीयते। एवमनादिकालत: नानाप्रकारै: तोष्टूयमानोपि मन्दाकिनीमहिमा न अद्यावधि नीरसतां गत: अपि तु नित्यनूतन इव बाभायते। पुराणादिग्रन्थेषु समुपवर्णिता गङ्गावतरणकथा महाकविश्रीभाष्यंविजयसारथिवर्यै: गीतिकाव्यपद्धतिम् अनुसरद्भि: पञ्चमात्राकेषु गीतेषु न्यबध्यत। औचित्यदृशा किञ्चिदिव कथा पर्यवर्त्यत इति कविभि: स्वयमुदघोषि अवतारिकायाम्।

लोकगीतपद्धत्या समुपनिबद्धेऽस्मिन् मन्दाकिनीकाव्ये तत्प्रवाहस्य वर्णनावसरे मन्दाकिनीप्रवाहस्य गते: ध्वने: वैविध्यं वैदग्ध्यं च अभिव्यञ्जयितुं गमनार्थकधातूनां ध्वन्यर्थकधतूनां च प्रयोगा: विपलतया सरसतया च प्रायुञ्जिषत। मूलधातूनां यङन्तानां यङ्लुगन्तानां नामधातूनां समासभूयिष्ठानां च प्रयोगा: यथेच्छं कविभि: अकारिषत। मन्दाकिनीप्रवाहेन सह कविभि: शब्दप्रवाह: कृत: दरीदृश्यते। अभीष्टमर्थं प्रतिपादयितुं विचित्राणि नानाविधानि धातुरूपाणि कवय: प्रायुञ्जिषत। अनेन कवीनां व्याकरणे पाण्डित्यं नितराम् अवलोक्यते।

**Copyright © 2022 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution 4.0 International License (CC BY-NC 4.0) which permits unrestricted use, distribution, and reproduction in any medium for non-commercial use provided the original author and source are credited.

**कथावस्तु:**

मन्दाकिनीं संगन्तुमुत्कण्ठितमना अपि सागर: भगवत: वेलातिक्रमावरोधबलवच्छासनात् गङ्गाया: बलवदवतारणेन लोकस्य भूयोऽपकृतेश्च भीत: सन् विरहवेदनामसहमानोऽपि किंकर्तव्यतामूढेन मनसा क्षणमिव विचिन्त्य स्वपरमसखं भगीरथं प्रार्थयामास। हे सखे! भवता कथमपि मम प्रिया सखी स्वर्णदी मन्दाकिनी आनीयताम् इति सागर: भगीरथं न्यवेदयत्। भगीरथोऽपि स्वमनोरथं सफलं मन्वान: कपिलमुनिशापाग्निना भस्मसात्कृतान् स्ववंशजान् सगरान् उद्धर्तुकाम: समुचितवेलामवलोक्य स्वर्लोकात् पापनाशिनीं मन्दाकिनीं भुवमानेतुं प्रतस्थे[३]।

भगीरथेन प्रार्थिता प्राणेश्वरं सागरमुपगन्तुमुत्कण्ठितमना मन्दाकिनी तमेवमवोचत् – हे भ्रात:! मत्प्रवाहसम्पातं धरा सोढुं न शक्नुयात्। यदि भगवान् गिरिश: मां वोढुं नियतमुपागमिष्यत् तर्हि मेऽवतरणं निर्बाधमभविष्यत्। अत: कर्मेदं सम्पादयितुं शिवं प्रार्थयस्वेति। मन्दाकिन्या निर्देशानुसारं तेन भगीरथेन सम्प्रार्थित: कपर्दी सदाशिव: स्वर्णदीं दरीधर्तुमुररीचकार। सैषा मन्दाकिनी शिवशिरसि संकोचितेनैव स्रोतसा अवततार। निजकपर्द एव बन्दीकर्तुकामस्य शिवस्य भावं जानाना सा मन्दाकिनी स्वनीरप्रवाहधाराप्रचुरेण स्रोतस्स्वरूपेण विजृम्भमाणा जटाजूटमयीं कारां निर्भिद्य बहिर्निरगच्छत्। भुवमवतीर्य सप्तधा विभक्तैस्स्वस्रोतोभि: सकलमपि भूमितलं पुनती भगीरथमार्गमनुसरन्ती भुवि विविधचेष्टा: कुर्वती अन्ते सागरेण प्रियसखेन मिलित्वा निलीना भवति। मन्दाकिन्या: भुवमवतीर्णाया: विविधक्रियाकलापा: कविभि: रुचिरशैल्या वर्ण्यन्ते।

**प्रतिपाद्यविषया:**

**मूलधातूनां वैशिष्ट्यम् -**

**अकति मन्दाकिनी**
**चकति मन्दाकिनी**
**तकति मन्दाकनी**
**मधुरेण पूरेण ॥१**

अक कुटिलायां गतौ इति मन्दाकिनी स्वकीयमधुरप्रवाहेन कुटिलं गच्छति। चक तृप्तौ इति मन्दाकिनी सन्तुष्यति। तक हसने इति मन्दाकिनी हसति इत्यर्थ:।

**चलति मन्दाकिनी**
**जलति मन्दाकिनी**
**सलति मन्दाकिनी**
**विमलेन सलिलेन ॥१**

चल कम्पने (भ्वादि:) उत चल विलसने (तुदादि:) इति मन्दाकिनी स्वशुद्धजलेन कम्पते उत विलसति। जल घातने इति मन्दाकिनी तीक्ष्णीभवति। सल गतौ इति मन्दाकिनी गच्छति इत्यर्थ:।

**स्यन्दते स्पन्दते स्कुन्दते स्वर्णदी**

**परिवहस्यावधौ[४] प्रेयसा स्रोतसा**

**सूदते मोदते ह्लादते स्वर्णदी**

**परिवहस्याजिरे श्रेयसा पाथसा ॥१**

स्वर्णदी मन्दाकिनी स्वोद्भवसीम्नि प्रियप्रवाहेन **स्यन्दते** प्रस्रवति, स्यन्दू प्रस्रवणे इति धातु: । तत: स्पदि किञ्चिच्चलने इति मन्दाकिनी **स्पन्दते** किञ्चिच्चलति । स्कुदि आप्रवणे इति मन्दाकिनी **स्कुन्दते** उत्प्लवते । मन्दाकिनी स्वकीयश्रेयोजलेन परिवहस्य अङ्गने **सूदते** प्रस्रवति, षूद क्षरणे इति धातु: । मुद हर्षे इति मन्दाकिनी **मोदते** हृष्यति । ह्लाद अव्यक्ते शब्दे इति मन्दाकिनी **ह्लादते** अव्यक्तध्वनिं करोति ।

**योतते जोतते श्रन्थते स्वर्णदी**

**परिवहस्याङ्गणे भूरिणा वारिणा**

**अंहते मंहते बंहते स्वर्णदी**

**परिवहप्राङ्गणे धीरया धारया ॥२**

स्वर्णदी मन्दाकनी परिवहस्य अङ्गने प्रभूतजलेन **योतते जोतते,** युतृ जुतृ भासने इति प्रकाशते । मन्दाकिनी **श्रन्थते** शिथिलं गच्छति, श्रथि शैथिल्ये इति धातु: । मन्दाकिनी परिवहस्य प्रङ्गणे धीरया धारया **अंहते** सर्पवत् गच्छति, अहि गतौ इति धातु: । मन्दाकिनी **मंहते बंहते** वृद्धिं गच्छति, महि बहि वृद्धौ इति धातु: ।

**कल्लते मल्लते घनवियन्मण्डले**

**कञ्चते काञ्चते घनतमोमण्डले**

**शल्भते गल्भते स्तनयित्नुमण्डले**

**त्रङ्कते वङ्कते तारकामण्डले**

**जोतते योतते ज्योतिषां मण्डले**

**सूदते ह्लादते सौरेऽपि मण्डले**

**श्विन्दते स्कुन्दते चन्द्रमोमण्डले ॥३**

मन्दाकिनी घने आकाशमण्डले **कल्लते** शब्दायते, कल्ल अव्यक्ते शब्दे इति धातु: । एवमेव घने आकाशमण्डले **मल्लते** धारयति, मल्ल धारणे इति धातु: । मन्दाकिनी घने अन्धकारसमूहे **कञ्चते काञ्चते** प्रकाशते, कञ्च काञ्च दीप्तिबन्धनयो: इति धातु: । एवं मन्दाकिनी बलाहकमण्डले **शल्भते गल्भते** स्तौति धृष्टतां धैर्यं च प्राप्नोति, शल्भ कत्थने इति गल्भ धार्ष्ट्ये इति च धातु: । मन्दाकिनी नक्षत्रमण्डले **त्रङ्कते वङ्कते** गच्छति कुटिला च भवति, त्रकि गतौ वकि कौटिल्ये इति च धातु: । एवं मन्दाकिनी ग्रहाणां मण्डले

**जोतते योतते** प्रकाशते, युतृ जुतृ भासने इति धातु: । तथा च सूर्यमण्डले मन्दाकिनी **सूदते ह्रादते** प्रस्रवति शब्दायते च, षूद क्षरणे इति ह्राद शब्दे इति च धातु: ।

**मन्देतरं जवति मन्दाकिनी**

**मन्देतरं द्रवति मन्दाकिनी ॥१३**

मन्दाकिनी **जवति** वेगेन गच्छति, जव वेगितायां गतौ इति धातु: । एवं मन्दाकिनी **द्रवति** गच्छति, द्रव गतौ इति धातु:।

**उत्पतति निष्पतति सम्पतति परिपतति**

**उल्लोललीलया कल्लोलमालया**

**अंहसां संहतिं संहरन्तीव सा**

**रंहसा ढौकते बृंहत्प्रवाहेन ॥१८**

अम्भसां भ्रमलीलया अम्भसां भ्रममालया च मन्दाकिनी उद्गच्छति निर्गच्छति सम्यग्गच्छति परिगच्छति च, पत्लृ गतौ इति उदादिभिरुपसर्गै: वर्तते । एवं समृद्धप्रवाहेन पापानां समूहं नाशयन्तीव मन्दाकिनी ढौकते वेगेन गच्छति, ढौकृ गतौ इति धातु: ।

**नारायणस्येव करुणातरङ्गिणी**

**क्षोणीतलं पवितुमापतति वेगेन**

**कम्पते झम्पते कण्डते कञ्चते**

**गल्भते गल्हते कम्रप्रवाहेन**

**गर्हते पापानि गोपते पण्यानि**

**ग्लेषते क्षेत्राणि ग्लेवते तीर्थानि ॥१८**

भगवत: विष्णो: करुणातरङ्गिणी इव इयं मन्दाकिनी भूतलं पवित्रीकर्तुम् आपतति । एवं मन्दाकिनी कम्पते चलति, कपि चलने इति धातु: । एवं मन्दाकिनी झम्पते गच्छति, झपि गतौ इति धातु: । एवं मन्दाकिनी कण्डते आनन्दति, कडि मदे इति धातु: । एवं मन्दाकिनी कञ्चते प्रकाशते, कचि दीप्तिबन्धनयो: इति धातु: । कमनीयप्रवाहेन मन्दाकिनी गल्भते, गल्भ धार्ष्ट्ये इति धीरतां प्राप्नोति । गल्हते मन्दाकिनी, गल्ह कुत्सायां निन्दतीत्यर्थ: । एवं मन्दाकिनी पापानि गर्हते, गर्ह विनिन्दने इति विनिन्दति इत्यर्थ: । पुण्यानि गोपते, गुप गोपने रक्षतीत्यर्थ: । ग्लेषते क्षेत्राणि, ग्लेषु अन्विच्छायाम् इति अन्विच्छति मन्दाकिनी । तीर्थानि ग्लेवते सेवते, ग्लेवृ सेवने इति धातु: । अर्थात् मन्दाकिनी तीर्थक्षेत्राणि अन्विच्छति सेवते च इत्याशय: ।

**सृम्भति स्वर्धुनी गिरिशिलामूलानि**

**शतकोटिधारया निजवारिधारया**

**कुम्भति द्योधुनी मरुभूमिखण्डानि**

**सम्भ्रमापूरेण निजवारिपूरेण**

ISSN–2278-5655

AARHAT MULTIDISCIPLINARY INTERNATIONAL EDUCATION RESEARCH JOURNAL

Volume–XI, Issue– IV July – August, 2022

OPEN ACCESS Original Research Article

**लुम्बति स्वर्णदी कण्टकानोकहान्**

**शाततरपाथसा[५] व्याततस्रोतसा**

**चुम्बति वियन्नदी तीरगतवल्लरी-**

**रत्यन्ततुङ्गेन निजवास्तरङ्गेण ॥१९**

स्वर्णदी शतकोटिनिजजलधारया पर्वतपाषाणमूलानि सृम्भति ताडयति, सृभि ताडने इति धातु: । आकाशगङ्गा सम्भ्रमनिजवारिप्रवाहेन मरुभूमिखण्डानि कुम्भति आच्छादयति, कुभि आच्छादने इति धातु: । स्वर्णदी स्वतीक्ष्णजलप्रवाहेन अनेककण्टकानि लुम्बति नाशयति, लुबि अर्दने इति धातु: । इयम् आकाशगङ्गा अत्यन्तशिखरप्रायेण स्वतरङ्गेण तीरगतवल्लरी: चुम्बति स्पृशति, चुबि वक्त्रसंयोगे इति धातु: ।

**स्फूर्च्छति स्फूर्जति स्फुण्डते स्फायते**

**प्रान्तरप्रान्तेषु गहनकान्तारेषु**

**स्नुह्यति क्वचिदपि स्फुर्णोति कुहवापि**

**स्पन्दते क्वचिदपि स्यन्दते कुहवापि ॥२०**

घनदुर्गमवर्त्मसु दूरशून्यमार्गभागेषु मन्दाकिनी स्फूर्च्छति आत्मानं विस्तारयति, स्फुर्च्छा विस्तृतौ इति धातु: । एवं मन्दाकिनी स्फूर्जति मेघगर्जनं करोति, ओ स्फूर्जा वज्रनिर्घोषे इति धातु: । तथैव स्फुण्डते परिहसति मन्दाकिनी, स्फुडि परिहासे इति धातु: । स्फायते मन्दाकिनी वर्धते, स्फायी वृद्धौ इति धातु: ।

**तेपते रेपते क्षीबते शीभते**

**निम्नोन्नतेषु नैकेषु प्रदेशेषु**

**वाडते शाडते दक्षते धुक्षते**

**कीकसप्रायेषु दुर्गमक्षेत्रेषु**

**अंहते रंहते वंहते मंहते**

**निर्जलप्रायेषु निर्जनप्रान्तेषु ॥२१**

मन्दाकिनी निम्नोन्नतेषु नैकेषु प्रदेशेषु तेपते सिञ्चति, तेपृ सेचने इति धातु: । रेपते गच्छति रेपृ गतौ इति धातु: । क्षीबते हृष्यति, क्षीबृ मदे इति धातु: । शीभते श्लाघते, शीभृ कत्थने इति धातु: । इयं मन्दाकिनी अस्थिकृमिकीटादिप्रायेषु दुर्गमप्रदेशेषु वाडते आप्लवनं करोति, वाडृ आप्लाव्ये इति धातु: । शाडते प्रशंसति, शाडृ श्लाघायाम् इति धातु: । दक्षते वर्धते, दक्ष वृद्धौ इति धातु: । धुक्षते सन्दीपयति, धुक्ष सन्दीपनक्लेशनजीवनेषु इति धातु: । निर्जलनिर्जनप्रदेशेषु इयं मन्दाकिनी अंहते रंहते गच्छति, अहि रहि गतौ इति धातु: । **वंहते मंहते** वर्धते, वहि महि वृद्धौ इति धातु: ।

**जृम्भते क्वचिदपि श्वम्भते कुत्रापि**

**श्रन्थते कर्हिचित् ग्रन्थते कुहवापि ॥२१**

प्रवहशीला मन्दाकिनी क्वचित् जृम्भते जृम्भणं करोति, जृभि गात्रविनामे इति धातु: । क्वचिदियं श्वम्भते, श्वम्भु प्रमादे इति प्रमाद्यति । क्वचित् मन्दाकिनी श्रन्थते शिथिला भवति, श्रथि शैथिल्ये इति धातु: । एवं क्वचित् गङ्गा ग्रन्थते ग्रथि कौटल्ये इति कुटिलं गच्छति इत्यर्थ: ।

**चन्दति स्रोतसा मन्दाकिनी**

**चञ्चति स्रोतसा मन्दाकिनी ॥३३**

**इरिणानि[६] सस्यालवालानि वितनोति**

**कामलानपि जलाधारांश्च विदधाति**

**खातानि पूरयति वेशन्तवापिका-**

**ह्रददीर्घिकातटाकादीनि पूरयति**

**देवखातानि किल निपृणाति निपिपर्ति**

**ऊष्मालवालानि विविधस्थलान्यपि ॥३७**

मन्दाकिनी प्रवाहेन चन्दति आह्लदयति, चदि आह्लादे दीप्तौ च इति धातु: । एवं स्वत: अम्बुसरणेन मन्दाकिनी चञ्चति गच्छति चञ्चु गतौ इति धातु: । ऊषरभूमौ सस्यालवालानि वितनोति विस्तारयति, वि उपसर्ग: तनु विस्तारे इति धातु: । मरुक्षेत्रमपि इयं मन्दाकिनी जलाश्रयं विदधाति करोति, वि उपसर्ग: डु धाञ् धारणपोषणयो: इति धातु: । इयं मन्दाकिनी खातवापिकाह्रददीर्घिकातटाकादीनि पूरयति, पॄ पालनपूरणयो: इति धातु: । उष्णावापयुक्तविवधस्थलान्यपि इयं निपिपर्ति पूरयति, नि उपसर्ग: पॄ पालनपूरणयो: इति धातु: जुहत्यादि: । तथा च बिलान्यपि निपृणाति पूरयति, नि उपसर्ग: पॄ पालनपूरणयो: इति धातु: ।

**गेष्णवो गायन्ति देष्णवो दीव्यन्ति**

**अप्नवश्शुच्यन्ति यातवस्सुख्यन्ति**

**मरवोऽपि सुफलन्ति भरवोऽपि पूषन्ति**

**यजता: प्रसीदन्ति दुरमता लुप्यन्ति**

**वञ्चथा: क्रन्दन्ति वन्दथा नन्दन्ति**

**वर्वरा[७]स्तृप्यन्ति गर्वरास्सीदन्ति**

**भाग्यानि पुष्यन्ति तस्या: प्रचारेण ॥४६**

मन्दाकिन्या: प्रचारेण गायका: गायन्ति, गै शब्दे इति धातु: । दातार: दीव्यन्ति, दिवु क्रीडाविजिगीषेत्यादिधातु: । वपूंषि पवत्रीभवन्ति, शुचिर् पूतीभावे इति धातु: । अध्वगा: सुखेन यात्रां कर्वन्ति, सुख तत्क्रियायाम् इति धातु: । मरुप्रदेशा अपि सुफला भवन्ति, सु उपसर्ग: फल निष्पत्तौ इति धातु: । स्वामिन: पूषन्ति वर्धन्ते पूष वृद्धौ इति धातु: । ऋत्विज: सन्तुष्यन्ति, प्र उपसर्ग: षद्लृ विशरणगत्यवसादनेषु

ISSN–2278-5655

AARHAT MULTIDISCIPLINARY INTERNATIONAL EDUCATION RESEARCH JOURNAL

*Volume–XI, Issue– IV* *July – August, 2022*

OPEN ACCESS Original Research Article

। रोगा: लुप्यन्ति अदृश्या भवन्ति, लुप विमोहने इति धातु: । वञ्चका: क्रन्दनं कुर्वन्ति, क्रदि आह्वाने रोदने च इति धातु: । स्तोतार: आनन्दन्ति, टु नदि समृद्धौ इति धातु: । पामरा: तृप्ता भवन्ति, तृप तृप्तौ इति धातु: । गर्विष्ठा नश्यन्ति, षद्लृ विशरणगत्यवसादनेषु इति धातु: । भाग्यानि समृद्धानि भवन्ति, पुष पुष्टौ इति धातु: । एवं मन्दाकिन्या: प्रचरणेन एते क्रियाकलापा भवन्ति ।

**बालका: खेलन्ति बालिका: केलन्ति**
**विलसन्ति यूनोऽपि युवतयो नृत्यन्ति**
**हृष्यन्ति कर्मठा जठराश्च तुष्यन्ति**
**सह्यन्ति मानिनो मौनिनस्सुह्यन्ति**
**चन्दन्ति कार्मिका: कर्षका नन्दन्ति**
**तूषन्ति पामरा: पण्डिता: पूषन्ति**
**आबालगोपालमारादिवालोक्य**
**क्षुत्पिपासाकुला मनुजा मुदं यन्ति ॥४७**

बालका: खेलन्ति बालिका: केलन्ति क्रीडन्ति, केलृ खेलृ चलने इति धातु: । युवान: विलसन्ति, लस श्लेषणक्रीडनयो: इति धातु: । युवतय: नृत्यन्ति, नृती गात्रविक्षेपे इति धातु: । कर्मठा: हृष्यन्ति, हृष तृप्तौ इति धातु: । जठराश्च तुष्यन्ति, तुष प्रीतौ इति धातु: । मानिन: सह्यन्ति, षह तृप्तौ इति धातु: । मौनिन: सुह्यन्ति प्रकाशन्ते, षुह चक्यर्थे इति धातु: । कार्मिका: चन्दन्ति आह्लादयन्ति, चदि आह्लादे दीप्तौ च इति धातु: । पामरा: तूषन्ति तुष्यन्ति, तूष तुष्टौ इति धातु: । पण्डिता: पूषन्ति वर्धन्ते, पूष वृद्धौ इति धातु: । मन्दाकिन्या: प्रचारेण आबालगोपालम् आरात् इव आलोक्य क्षुत्पिपासापीडिता मनुष्या: सन्तोषं यन्ति प्राप्नुवन्ति, इण् गतौ इति धातु: ।

**पनसासु विहरन्ति तृणसासु विलसन्ति**
**बिलसासु बिन्दन्ति बुससासु दोलन्ति**
**नडसासु नन्दन्ति फलसासु फक्कन्ति**
**शुचिशीतपाथांसि सुरनदीस्रोतांसि**
**इरिणेषु दुष्टूषदोषालिमपनीय**
**साराणि सुष्ठु कृषिसाराणि विकिरन्ति**
**उच्चावचानि॔ किल कलमादिवलजानि**
**सस्यसम्पन्नानि साधु संस्कुर्वन्ति**
**धन्वसु व्याकीर्णनादेयशादेन**
**काश्मीरकेदारखण्डानि निर्मान्ति ॥४८**

मन्दाकिन्या: शुभ्रशीतजलानि पनसासु विहरन्ति, तृणसासु विलसन्ति, बिलसासु बिन्दन्ति प्रविशन्ति, बिदि प्रवेशने इति धातु: ।

बुससासु कडङ्गरप्रदेशेषु दोलन्ति उत्क्षिपन्ति, दुल उत्क्षेपे इति धातुः । नलतृणप्रदेशेषु नन्दन्ति, फलभरितप्रदेशेषु पक्कन्ति नीचैर्गच्छन्ति, फक्क नीचैर्गतौ इति धातुः । एवं जलानि ऊषरक्षेत्रेषु ऊषदोषम् अपनीय कृषिसाराणि विकिरन्ति, उदगवाग्विद्यमानान् कलमादिकेदारान् सस्यसम्पन्नान् संस्कुर्वन्ति, मरुप्रदेशेषु विकीर्णनादेयशादेन(उदककर्दमेन) काश्मीरवलजखण्डानि निर्मान्ति ।

**व्रीहिलां हिन्वन्ति शालिलां जिन्वन्ति**

**माषिलामुर्वरां यविलां च पिन्वन्ति**

**जोनालभूमिमपि सूर्क्षन्ति पाथसा**

**काङ्गवीनावनीं करुणया निन्वन्ति**

**श्यामाकतोक्मादिसस्यानि पुष्णन्ति**

**कुल्माषगोधूमचणकानि धिन्वन्ति ॥४८**

मन्दाकिन्याः जलानि व्रीहिक्षेत्रं हिन्वन्ति प्रीणन्ति शालितण्डुलक्षेत्रं च जिन्वन्ति प्रीणन्ति, जिवी हिवी प्रीणने इति धातुः। यवमाषादिक्षेत्रं च पिन्वन्ति सिञ्चन्ति, पिवि सचने इति धातुः । वन्ध्यभूमिमपि सूर्क्षन्ति आद्रियन्ते, सूर्क्ष आदरानादरयोः इति धातुः । व्यर्थभूमिमपि करुणया निन्वन्ति सिञ्चन्ति, निवि सेचने इति धातुः । श्यामाकादिसस्यानि पुष्यन्ति, माषादिधान्यानि धिन्वन्ति प्रीणन्ति, धिवि प्रीणने इति धातुः ।

**यङन्तधातूनां वैशिष्ट्यम्** –

**दन्द्रम्यते**[६] **स्वेच्छया**

**जंहम्यते स्वेच्छया ॥२०**

मन्दाकिनी स्वेच्छया भृशं कटिलं द्रम्मति हम्मति च, द्रम्म हम्म गतौ इति धातुः ।

**दोद्रूयते क्वापि पोप्लूयते क्वापि**

**जागल्यते क्वापि लोलुट्यते**

**सोस्रूयते क्वापि वेव्रीयते क्वापि**

**डेडीयते क्वापि चेक्षीयते**

**चोकुट्यते क्वापि नानट्यते क्वापि ॥३२**

मन्दाकिनी क्वचित् **दोद्रूयते** भृशं द्रवति, क्वचित् **पोप्लूयते** भृशं प्लवते, क्वचित् **जागल्यते** भृशं गालयते, गल स्रवणे इति धातुः । क्वचित् **लोलुट्यते** भृशम् अवरुणद्धि, लुट प्रतिघाते इति धातुः । क्वापि **सोस्रूयते** अतिशयेन स्रवति । क्वचित् **वेव्रीयते** भृशम् आवृणोति । क्वचित् **डेडीयते** भृशं डीयते । क्वचित् **चेक्षीयते** भृशम् क्षिणोति । क्वचित् अतिशयेन **चोकुट्यते** कुटिलं गच्छति, कुट कौटिल्ये इति धातुः । क्वचित् **नानट्यते** भृशं नटति ।

**अद्धा पनीपद्यते सम्भ्रमै-**

**रिङ्खा पनीपत्यते ॥५९**

मन्दाकिनी अञ्जसा **पनीपद्यते** भृशं गच्छति। मन्दाकिनी अञ्जसा **पनीपत्यते** भृशं पतति।

**औदार्यसम्पदा शोशुभ्यते**

**सौन्दर्यसम्पदा मोमुद्यते ॥६०**

मन्दाकिनी उदारगुणै: **शोशुभ्यते** अतिशयेन शोभते। मन्दाकिनी सौन्दर्यसम्पत्त्या **मोमुद्यते** अतिशयेन मोदते।

**बम्भ्रम्यते स्वेच्छया**

**रंरम्यते स्वेच्छया ॥७६**

मन्दाकिनी **बम्भ्रम्यते** अतिशयेन भ्रमति। मन्दाकिनी **रंरम्यते** अतिशयेन रमते।

**नामधातूनां वैशिष्ट्यम्** –

**ओजायते[१] क्वापि मन्दायते क्वापि**

**विमनायते क्वापि सुमनायते क्वापि**

**फेनायते क्वापि गर्वायते क्वापि**

**हरितायते क्वापि नीलायते ॥२१**

मन्दाकिनी क्वचित् **ओजायते** दीप्तिरिव आचरति, क्वचित् **मन्दायते** मन्दमिव आचरति, क्वचित् **विमनायते** अविमना विमना भवति, क्वचित् **सुमनायते** असुमना: सुमना भवति, क्वचित् **फेनायते** फेनम् उद्वमति फेनायते, क्वचित् **गर्वायते** गर्ववदाचरति, क्वचित् **हरितायते** अहरिता हरिता भवति, क्वचित् **नीलायते** अनीला नीला भवति नीलायते।

**शब्दायते क्वापि निर्झरीवृन्देन**

**स्पर्धायते क्वापि रंहसा श्वसनेन**

**कलहायते क्वापि तुङ्गाद्रिनिचयेन**

**वैरायते क्वापि गहनकान्तारेण ॥३३**

मन्दाकिनी क्वचित् निर्गतजलप्रवाहवृन्देन **शब्दायते** शब्दं करोति, वेगेन श्वासेन क्वचित् **स्पर्धायते** स्पर्धां करोति, तुङ्गपर्वतसमूहेन क्वचित् **कलहायते** कलहं करोति, क्वचित् निबिडदुर्गमवनेन **वैरायते** वैरं करोति।

**मन्तूयति क्वापि वल्गूयति क्वापि**

**केलायति क्वापि खेलायति क्वापि**

**तन्तस्यति क्वापि गद्गद्यति क्वापि**

**ईयस्यति क्वापि लोटायति क्वापि ॥६९**

मन्दाकिनी क्वचित् **मन्तूयति** रोषं करोति, मन्तु रोषे अपराधे च इति कण्ड्वादिधातु:। क्वचित् वल्गूयति पूजयति, वल्गु

पूजामाधुर्ययो: इति कण्ड्वादिधातु: । क्वचित् केलायति,खेलायति, लोटायति =विलसति, केला खेला लोटा विलासे इति कण्ड्वादिधातु: । क्वचित् मन्दाकिनी तन्तस्यति दु:ख्यति, तन्तस दु:खे इति कण्ड्वादिधातु: । क्वचित् गद्गद्यति स्खलति, गद्गद वाक्स्खलने इति कण्ड्वादिधातु: । क्वचित् मन्दाकिनी ईयस्यति ईर्ष्यति, ईयस ईर्ष्यायाम् इति कण्ड्वादिधातु: ।

**यङ्लुगन्तधातूनां वैशिष्ट्यम्** –

**वेगेन दोद्रोति[१०] मन्दाकिनी**

**वाजेन सोस्रोति मन्दाकिनी ॥१३**

मन्दाकनी **दोद्रोति** भृशं वेगेन द्रवति गच्छति, मन्दाकिनी **सोस्रोति** भृशं वेगेन स्रवति ।

**मोदमनुबोभोति सर्वधा क्षेत्रेषु**

**नानन्ति पुण्यालवालेषु तीर्थेषु**

**दाधाति पुण्यानि तूस्तेषु देशेषु**

**देदिवीति स्वच्छकासारतीरेषु**

**मोमोक्ति कलुषाणि तोतोत्ति जाड्यानि**

**रोरोद्धि मान्द्यानि नोनोत्ति शैल्यानि ॥२८**

सर्वधा मन्दाकिनी क्षेत्रेषु **अनुबोभोति** भृशं मोदमनुभवति । पुण्यावापेषु तीर्थेषु **नानन्ति** अतिशयेन प्रह्वीभवति । पापेषु देशेषु **दाधाति** भृशं पुण्यानि दधाति । शुभ्रसरोवरतीरेषु **देदिवीति** भृशं क्रीडति । **मोमोक्ति** पापानि अतशयेन मुञ्चति । जाड्यानि **तोतोत्ति** भृशं पीडयति । मन्दत्वं **रोरोद्धि** भृशमवरुणद्धि । शैलसमूहान् **नोनोत्ति** अतिशयेन नुदति ।

**दन्द्रमीति स्वेच्छया**

**जंहमीति स्वेच्छया ॥३४**

मन्दाकिनी स्वैरेण **दन्द्रमीति** भृशं द्रमति, **जंहमीति** भृशं हमति गच्छति इत्यर्थ: ।

**मालेषु डेडेति शैलेषु पोप्लोति**

**खातेषु चञ्चूर्त्यखातेषु चोकूर्ति**

**उच्चेषु चोस्कन्ति कच्छेषु चोस्कुन्ति**

**अरियर्ति गहनेषु वरिवर्ति कोणेषु**

**इरिणेषु जाहर्ति प्रवणेषु नानर्ति**

**जङ्घन्ति कूलानि चङ्खन्ति मूलानि ॥३८**

मन्दाकिनी म्लेच्छजातिषु **डेडेति** अतिशयेन डीयते । **पोप्लोति** शैलेषु भृशं प्लवते । पुष्करिण्यां **चञ्चूर्ति** भृशं गच्छति । देवखातके **चोकूर्ति** अतिशयेन कूर्दते । उच्चप्रदेशेषु **चोस्कन्ति** अतिशयेन उत्प्लवते । जलाधिकदेशेषु **चोस्कुन्ति** प्लवते अतिशयेन । गहनेषु

ISSN–2278-5655

AMIERJ Aarhat Multidisciplinary International Education Research Journal

*Volume–XI, Issue– IV* *July – August, 2022*

OPEN ACCESS Original Research Article

**अरियर्ति** अतिशयेन गच्छति। कोणेषु **वरिवर्ति** भृशं वर्तते। ऊषरक्षेत्रेषु **जाहर्ति** भृशं हरति। अतिशयेन **नानर्ति** नृत्यं करोति। तीराणि **जङ्घन्ति** अतिशयेन हन्ति। मूलानि **चङ्खन्ति** अतिशयेन खनति।

**चाकर्ति शैत्यानि मन्दाकिनी**

**चरिकर्ति सुकृतानि मन्दाकिनी ॥३८**

मन्दाकिनी शैत्यानि **चाकर्ति** अतिशयेन कर्तयति। मन्दाकिनी **चरिकर्ति** अतिशयेन पुण्यानि करोति।

**तत्करोति तदाचष्टे** –

**ऊषरक्षेत्राणि केदारयति नैक-**

**केदारखण्डानि सस्यसम्पन्नयति**

**मरुभूमिमपि पूर्णकासारयति शुष्क-**

**सस्यानि फलयति स्वीयसारेणैव**

**मर्त्यखण्डममर्त्यखण्डं वितन्वती ॥२९**

मन्दाकिनी मरुक्षेत्राणि **केदारयति** वलिजानि करोति। अनेकवलजखण्डानि **सस्यसम्पन्नयति** सस्यसम्पन्नानि करोति। मरुभूमिम् अपि **पूर्णकासारयति** सम्पूर्णतया सरोवरयुक्तां करोति। स्वजलप्रवाहेन एव शुष्कसस्यानि अपि **फलयति** फलयुक्तानि करोति। भूलोकं स्वर्लोकं विस्तारयन्ती प्रवहति मन्दाकिनी। एवं चैते प्रयोगा: तत्करोति तदाचष्टे इति गणसत्रेण णिचि निष्पन्ना:।

**कारकवैशिष्ट्यम्** –

**आम्नातिभिश्श्रुतिषु सम्पूजिता सती**

**पठितिभिश्शास्त्रेषु सुश्लाघिता सती**

**इष्टिभिर्यागेषु बहुधेडिता सती**

**पूर्तिभिर्दानेषु बहुमानिता सती ॥३६**

क्तस्येन्विषयस्य कर्मण्युपसंख्यानम् इति वार्तिकेन सप्तमी भवति। मन्दाकिनी श्रुतीनाम् अभ्यासं कुर्वद्भि: सम्पूजिता। एवं शास्त्राणि पठिवद्भि: सुश्लाघिता इयम्। य: यागान् इष्टवान् तेन बहुवारं स्तुता। एवं दानानां पूरणेन सा बहुसम्मानिता अभवत्।

**निष्कर्ष:**

महाकविश्रीभाष्यंविजयसारथिविरचितमन्दाकिनीकाव्यमिदं क्रियापदसमासकारकादिव्याकरणपरिष्कृतपरिनिष्ठितपदलालित्यगुम्फितं राराज्यते बाभ्राज्यते शोशुभ्यते बाभास्यते बाभायते च। एतत्सहचरितविशिष्टनामपदमकरन्दवृन्दचन्दनमन्दाकिनी सहृदयहृदयसिंहासनारूढानवरतं कलिकेलितकविकोकिलकुलकलकलकलाकलिता विदुषामपि निकषायमाना निष्कर्षकोषतां गता सपामरामरानपि आरामभ्रमणरमणमिव सन्तोषयत्यानन्दयति संवर्धयति परिपोषयति वंहयति मंहयति च। प्रकृतशोधपत्रे विशिष्टक्रियापदप्रयोगा: क्रियावैचित्र्यबोधाय स्व्यकारिषत।

ISSN–2278-5655

AARHAT MULTIDISCIPLINARY INTERNATIONAL EDUCATION RESEARCH JOURNAL

Volume–XI, Issue– IV July – August, 2022

OPEN ACCESS Original Research Article

**सन्दर्भटिप्पण्य:**

१. अक गतौ भ्वादि:, परस्मैपदी, लट्।

२. गै शब्दे यङ्, लट्।

३. प्र उपसर्ग:, लिट्, समवप्रविभ्य: स्थ: इति आत्मनेपदम्।

४. परिवह:-वियद्गङ्गाया: उद्भवस्थानम्।

५. पाथसा-जलेन।

६. इरिणानि-ऊषरक्षेत्रं शून्यं च।

७. वर्वरा: - प्राकृतो जन:।

८. नित्यं कौटिल्ये गतौ इति यङ्।

९. कर्तु: क्यङ् सलोपश्च इति क्यङ्।

१०. यङोऽचि च इति यङ्लुक्।

**सन्दर्भग्रन्थसूची :**

**१. मन्दाकिनी** – महकवि: श्रीभाष्यं विजयसारथि:, सर्ववैदिकसंस्थानम्, करीण्नगरम्-१९९८

**२. बृहद्धातुकुसुमाकर: -** सम्पादक:, पं.हरेकन्तमिश्र:, चौखम्बासंस्कृतप्रतिष्ठानम्, वाराणसी-१९९९

**३. अमरकोष:- अमरसिंह:,** चौखम्बासंस्कृतप्रतिष्ठानम्, वाराणसी-२०००

४. **वाचस्पत्यम्-** संकलनम्, श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य:, चौखम्बासंस्कृतसीरीस्, वाराणसी-१९६२

**५. शब्दकल्पद्रुम: -** राजा राधाकान्तदेवबाहादुर:, मोतीलाल बनारसीदास:, नवदेहली-१९७२

*Cite This Article:*

* **डा. शिवरामभट्ट:**, *(2022).* **महाकविश्रीभाष्यंविजयसारथिविरचितमन्दाकिन्यां व्याकरणवैशिष्ट्यम्**, *Aarhat Multidisciplinary International Education Research Journal, XI (IV) July – August, 110-121.*